ॐ

ISSN :- 0976-4321

वास्तुशास्त्र अध्ययन माला – द्वादश पुष्प

# वास्तुशास्त्रविमर्श

सन्दर्भित एव मूल्याङ्कित शोधपत्रिका

वायव्य उत्तर ईशान

पश्चिम



पूर्व

नैर्ऋत्य दक्षिण आग्नेय

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
( मानितविश्वविद्यालयः )
नवदेहली-110016

ISSN :- 0976-4321

वास्तुशास्त्र अध्ययन माला-द्वादश पुष्प

# वास्तुशास्त्रविमर्श

## सन्दर्भित एवं मूल्याङ्कित शोधपत्रिका

प्रधान सम्पादक
प्रो. रमेशकुमार पाण्डेय
कुलपति

सम्पादक
डॉ. अशोक थपलियाल
सहाचार्य एवं अध्यक्ष

वास्तुशास्त्र विभाग
श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ
(मानित विश्वविद्यालय)
नव देहली-110016

# विषयानुक्रमणिका


| | | |
|---|---|---|
| 1. वृक्षायुर्वेदे वराहमिहिरस्यावदानम् | **डॉ. सुशीलकुमारः,**<br>सहाचार्यः ज्योतिषविभागः<br>श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्<br>नवदेहली-१६<br><br>**श्रीखेमराजरेग्मी**<br>(शोधच्छात्रः ज्योतिषविभागः)<br>श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्<br>नवदेहली-१६ | 1-7 |
| 2. वैदिकवाङ्मये वास्तुनिदर्शनम् | **डॉ. हनुमानमिश्रः**<br>सहाचार्यः, वेदविभागः<br>श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्<br>नवदेहली-१६ | 8-13 |
| 3. वास्तुशास्त्रदृशा जम्बूद्वीपविमर्शः | **डॉ.अशोकथपलियालः**<br>सहाचार्यः, वास्तुशास्त्रविभागः,<br>श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्<br>नवदेहली-१६<br><br>**गोविन्दवल्लभः**<br>शोधच्छात्रः, वास्तुशास्त्रविभागः,<br>श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्<br>नवदेहली-१६ | 14-22 |
| 4. जयसिंहनिर्मापितस्य जयपुरनगरस्य वास्तुशास्त्रीयाध्ययनम् | **डॉ. प्रवेशव्यासः**<br>सहायकाचार्यः, वास्तुशास्त्रविभागः,<br>श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्<br>नवदेहली-१६<br><br>**श्रीकृष्णाचन्दशर्मा**<br>शोधच्छात्रः, वास्तुशास्त्रविभागः<br>श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्<br>नवदेहली-१६ | 23-30 |

# जयसिंहनिर्मापितस्य जयपुरनगरस्य वास्तुशास्त्रीयाध्ययनम्

**श्रीकृष्णचन्दशर्मा**
**डॉ. प्रवेशव्यासः**

भारतदेशे राजस्थानप्रदेशे च बहूनि प्राचीननगराणि वर्तन्ते। तत्र प्रत्येकं नगरं वास्तुशास्त्रदृष्ट्या विशिष्टमस्ति। एतादृषमेव नगरमेकं वर्तते जयपुरम्। नगरमिदं राजस्थानप्रदेशस्य राजधानीत्वेन विलसति। जयपुरनगरस्य स्थापनाकाले भारते केन्द्रीयसत्तायाः वसः पूर्णरुपेण सञ्जातमासीत्। राजनैतिकरिक्ततया सह सांस्कृतिकरिक्तताऽपि समुत्पन्ना। ताम् सांस्कृतिकरिक्ततां परिपूर्णाय आम्बेरनृपेण एतादृशी प्राक्कल्पना चिन्तिता येन सः सांस्कृतिकभूभागे सर्वोच्चस्थाने प्रतिष्ठापयितुं शक्नुयात्। आमेरराज्यस्य पूर्वीभागे जाटशासकानाम् अभ्युदयः आमेरप्रदेशाय चिन्ताप्रदमासीत्। यद्यपि मुगलसाम्राज्यान्तर्गतत्वेनैव जाटशासकाः सक्रिया आसन्। वकीलरिपोर्टानुसारं[१] राजारामसिंहप्रथमस्य काले जाटशासकाः आमेरराज्याय संकटग्रस्ताः सञ्जाता आसन्। अतः मुगलादेशानुसारं रामसिंहस्य पुत्रः विशनसिंहः जाटैस्साकं 1688 तमे ईस्वीयवत्सरे युद्धाय उद्यतः परन्तु पराजय अवाप्नोत्।[२] विशनसिंहस्य असामयिकमृत्योरनन्तरं सवाईजयसिंहः सिंहासनारुह्य जाटयुद्धाभियानद्वयमकरोत्। प्रथमाभियाने पराजितो भूत्वा 1722 तमे वत्सरे द्वितीयाभियाने विजय आप्नोत्।[३] विजयोपरान्तं जयसिंहः दिल्लीनगरं गत्वा वेधशाला विजयस्मृतित्वेन निर्मापयितुम् अचिन्तयत्। परन्तु अनेन कार्येण तस्य सन्तुष्टिः न जाता। अतः नगरनिर्माणाय तस्य मनसि विचारः स्फुटितः।

जदुनाथसरकारः जयपुरस्य इतिहासः इत्यस्मिन् पुस्तके प्रतिपादयति-धूनविजयोपरान्त जयसिंहः चत्वारि वर्षाणि यावत् गगस्नान-बृजपरिक्रमा, दिल्लीनगरे वेधशालानिर्माणम्, आमेरराज्ये जयनिवासप्रासादनिर्माणे व्यस्तो अभवत्।[४] यद्यपि जयपुरनिर्माणप्रक्रिया 1725 तमे ईस्वीय वत्सरैव प्रारम्भा। परन्तु अस्य विधिवत् शिलान्यासः 1727 तमे वत्सरे नवंबरमासस्य अष्टादशतमे दिनाटे विक्रमसंवत्सरे 1784 तमे पौषमासस्य कृष्णप्रतिपदायां[५] समभवत्।

---

1. केशोरायात् रामसिंहः 1687, राज.राज्य अभिलेखागारः बीकाणा, पृ.- 115।
2. तत्रैव।
3. भरतपुर अपटू 1826, जयपुर-1970, पृ. 26।
4. जदुनाथ सरकार, ए हिस्ट्री आफ जयपुर, पृ. 205।
5. करि असीम विनती करि देहा वेग वसाय। संवत सतरेसो सुनी चौरासी मन लाय।।
   पौषहि सुदि परिवा जहाँ वार सनीसरवरा। गिरधारी या शहर को जनम महा सुभवार।।
   गिरधारीभोजनसार दोहा 190-191।

National Journal of Hindi & Sanskrit Research

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2022; 1(41): 25-27
© 2022 NJHSR
www.sanskritarticle.com

**डॉ. प्रवेशव्यासः**
सहायकाचार्यः, वास्तुशास्त्रविभागः,
श्री ला.ब.शा.रा.सं.विश्वविद्यालय,
नई दिल्ली-110016

**Correspondence:**
**अमितजोशी**
शोधच्छात्रः, वास्तुशास्त्रविभागः,
श्री ला.ब.शा.रा.सं.विश्वविद्यालय,
नई दिल्ली-110016

# राजवल्लभवास्तुशास्त्रानुसारेण द्विशालभवनां वर्णनम्

**डॉ. प्रवेशव्यासः, अमितजोशी**

भारतीयवास्तुशास्त्रीयग्रन्थेषु भवननिर्माणस्य सन्दर्भे एकशाल-द्विशाल-त्रिशाल-चतुश्शालगृहाणां वर्णनं प्राप्यते। सूत्रधारमण्डनप्रणीते राजवल्लभवास्तुशास्त्रे रचनाकारेण एतेषाम् एकशालादीनां गृहाणां वर्णनं षष्ठ-सप्तमाध्याये कृतमस्ति। तत्र षष्ठाध्याये एकशालद्विशालगृहलक्षणं नाम्ना द्वयोः भवनयोः पृथक्-पृथग्वर्णनं प्राप्यते। राजवल्लभोक्तानां द्विशालगृहाणां वर्णनेषु अपराजितपृच्छायाः समराङ्गणसूत्रधारस्य च प्रभावः प्रत्यक्षरूपेण दरीदृश्यते, इदं सूत्रधारः मण्डनः स्वयमपि स्वीकरोति। अस्य वर्णनं सूत्रधारमण्डनेन षष्ठाध्यायस्य प्रथमश्लोके प्रतिपादितमस्ति यथा –

**अथैकशालाद्विगुणाब्धिशालं प्रस्तारतो लक्षणमेव तेषाम्।**
**यथोदितं वास्तुमते तथैव ब्रवीमि राज्ञामथ मानवानाम्।।**[1]

अनेन श्लोकमाध्यमेन ज्ञायते यदिदं राजभवनानां शालानां वर्णनं पूर्ववर्तिनां वास्तुशास्त्रस्य आचार्याणाम् अनुसारेणैवस्ति। निश्चयेन सूत्रधारमण्डनस्येदं संकेतं नारद-श्रीपति-वशिष्ठ-विश्वकर्मादीनाम् आचार्याणां सन्दर्भे अस्तीति मन्ये।

## द्विशालभवनानां वर्णनम्

राजवल्लभवास्तुशास्त्रस्य षष्ठे अध्याये यद् द्विशालभवनानां वर्णनं प्राप्यते तत्र चतुः प्रकारकाणि द्विशालभवनानि दृश्यन्ते। एताः करिणी-महिषी-गावी-छागीनामभिः विख्याताः सन्ति। एतेषां द्विशालभवनानां निर्माणाय भवनयोग्यभूखण्डस्य नवभागेषु विभाजनं कृत्वा तत्र मध्यभागं त्यक्त्वा शेषभागे शालानिर्माणं भवति। अत्र चतुर्दिक्षु करिण्यादीनां चतुर्णां प्रकारकाणां शालानां निर्माणं भविष्यति।[2] अनेन प्रकारेण दक्षिणाग्निकोणस्थितकोष्ठकेषु निर्मितशालयोः मुखं यदि उत्तरदिशायां भवेत्तर्हि तत् करिणीनामकं द्विशालभवनं प्रसिद्धं भवति। नैर्ऋत्यपश्चिमकोणस्थितकोष्ठकेषु निर्मितशालयोः मुखं पूर्वदिशायां यदि भवेत्तर्हि तत् महिषीनामकं द्विशालभवनं प्रसिद्धं भवति। वायोव्योत्तरकोणस्थितकोष्ठकेषु निर्मितशालयोः मुखं दक्षिणे यदि भवेत्तर्हि तत् गावीनामकं द्विशालभवनं प्रसिद्धं भवति। अथ च पूर्व-ईशानकोणस्थितकोष्ठकेषु निर्मितशालयोः मुखं पश्चिमदिशायां भवेत्तर्हि तत् छागीनामकं द्विशालभवनं प्रसिद्धं भवति। उक्तञ्च राजवल्लभवास्तुशास्त्रे –

**याम्याग्निगा च करिणी धनदाभिवक्त्रा पूर्वानना च महिषी पितृवारुणस्था।**
**गावीयमाभिवदनापि च रोगसौम्येच्छागी महेन्द्रशिवयोर्वरुणाभिवक्त्रा ।।**[3]

वर्णनमिदं अत्र सरलतया स्पष्टीक्रियते –

**1.करिणी-** दक्षिणाग्निकोणस्थकोष्ठकेषु स्थिता उत्तरमुखा।

**2.महिषी-** नैर्ऋत्यपश्चिमकोणस्थकोष्ठकेषु स्थिता पूर्वमुखा।
**3.गावी-** वायव्योत्तरकोणस्थकोष्ठकेषु स्थिता दक्षिणमुखा।
**4.छागी-** पूर्व-ईशानकोणस्थकोष्ठकेषु स्थिता पश्चिममुखा।

**द्विशालभवनप्रकाराः**

राजवल्लभवास्तुशास्त्रानुसारेण सिद्धार्थ-यमसूर्य-दण्ड-काच-चुल्ली इति पञ्च प्रमुखभेदाः भवन्ति। अन्येऽपि भेदाः तत्र वर्णिताः सन्ति परञ्च तेषां समायोजनं एतेषामेव सिद्धार्थादीनाम् अन्तर्गतमेव भवति। तत्र चतुषष्ठिसंज्ञकानि द्विशालभवनानि राजवल्लभवास्तुशास्त्रे वर्णिताः सन्ति। यस्मिन् गृहे करिणी-महिषीशाले निर्मिते भवतः तद् गृहं सिद्धार्थसंज्ञको भवति। भवनमेतत् शुभफलप्रदायको भवति। यस्मिन् गृहे गावी-महिषीशाले निर्मिते भवतः तद् गृहं मृत्युकारकं भवति। यस्मिन् हस्तिनी-छागीशाले निर्मिते स्तः तद् गृहं काचसंज्ञको भवति। एतद् गृहं धननाशको भवति। गावी-करिणी शालाभ्यां संयोगेन यद् गृहं निर्मीयते तत् चुल्लीनाम्ना सुविख्यातं वर्तते। उक्तञ्च राजवल्लभवास्तुशास्त्रे –

**हस्तिन्यो महिषी द्विशालभवनं सिद्धार्थकं तच्छुभं।**
**गावीमाहिषसंज्ञकं मृतिकरं तद्यामसूर्यं भवेत्।।**
**दण्डं छागगवान्वितं धनहरं हस्तिन्यजाभ्यां तथा।**
**काचं गोकरिणियुतं नहि शुभं चुल्ली च पूर्वापरम्।।**[4]

द्विशालगृहाणां एवमेव प्रकारस्य वर्णनं समराङ्गणसूत्रधारे अपि वर्णितं वर्तते तस्यानुसारेण यत् शुभाशुभत्वं स्वीकृतमस्ति तस्य वर्णनम् अधः क्रियते।[5] यथा तालिकायां वर्णितमस्ति –

| क्र.सं. | भवनानां संयोगः | संज्ञा | शुभाशुभत्वम् |
|---|---|---|---|
| 1. | हस्तिनी-महिषीशालासंयोगः | सिद्धार्थः | प्रशस्तः |
| 2. | गावी-महिषीशालासंयोगः | यमसूर्यः | मृत्युकारकः |
| 3. | छागी-गावीशालासंयोगः | दण्डः | धनक्षयः |
| 4. | हस्तिनी-छागीशालासंयोगः | काचः | अशुभः |
| 5. | हस्तिनी-गावी शालासंयोगः | चुल्ली | अशुभः |

अनेनैव प्रकारेण द्वाभ्यां हस्तिन्यादयाभ्यां शालाभ्यां समन्वयेन संतत-शातिद-वर्धमान-कुक्कुट इति चत्वारि द्विशालभवनानि भवन्ति। द्वाभ्यां हस्तिनीभ्यां संयोगेन संततभवनं निर्मीयते। अनेनैव प्रकारेण द्वाभ्यां महिषीशालाभ्यां संयोगेन शान्तिदगृहं निर्मीयते। द्वाभ्यां गावीशालाभ्यां संयोगेन वर्धमानगृहं तथा च द्वाभ्यां छागीशालाभ्यां संयोगेन कुक्कुटगृहं निर्मीयते। वर्णितञ्च राजवल्लभवास्तुशास्त्रे –

**नामान्यतः संततशान्तिदं च स्याद्वर्धमानं त्वथ कुक्कुटाख्यम्।**
**हस्त्यादितो नामचतुष्टयं च हर्म्यं द्विशालं प्रथमं तथैव ।।**[6]

इदं तालिकामाध्यमेन स्पष्टीयते –

| क्र.सं. | समसंज्ञकः | निष्पन्ननाम |
|---|---|---|
| 1. | द्वाभ्यां हस्तिनीभ्यां संयोगः | सन्ततः |
| 2. | द्वाभ्यां महिषीभ्यां संयोगः | शान्तिदः |
| 3. | द्वाभ्यां गावीभ्यां संयोगः | वर्धमानः |
| 4. | द्वाभ्यां छागीभ्यां संयोगः | कुक्कुटः |

उपर्युक्तनवनिष्पन्नेषु गृहेषु द्वार-अलिन्द-षड्दारुनिर्माणभेदेन संततादयः अन्यगृहाणामपि संज्ञा भवति। सूत्रधारमण्डनस्य इदं नामाभिधानं वास्तुसारप्रकरणे वर्णितानां गृहसंज्ञानाम् अनुवर्तनमेव वर्तते।[7] तत्र चतुष्षष्ठिप्रकारकाणां गृहाणां नामानि वर्णितानि सन्ति परञ्च मण्डनानुसारेण शान्तादि द्विशालगृहाणि प्रामुख्येन षोडशप्रकारकाः भवन्ति। एतान्येव षोडशभवनानि अन्यापि करिण्यादि भेदेभ्यः चत्वारः-चत्वारः प्रकारकाः भवन्ति। वर्णितञ्च राजवल्लभवास्तुशास्त्रे –

**शान्तादिगेहानि च षोडशैव द्विशालकानीह यथाक्रमेण।**
**नामानि चत्वार्यपि रूपमेकं हस्तादिभेदैः क्रमतो विधेयम्।।**[8]

राजवल्लभवास्तुशास्त्रस्य सप्तमेऽध्याये सूर्यादिषोडशद्विशा-लगृहाणां यद् वर्णनं प्राप्यते तस्यानुसारेण षोडशगृहाणां नामानि क्रमशः सूर्य-वासव-प्रासाद-विमल-वीर्यवन्त-भासुर-दुंदुभ-सुतेज-हयज-महान्तगेह-त्रयलोक्याडम्बर-वरद-मालीन-विलास-कमल-सुन्दरेति सन्ति।[9] एतेषां वर्णनं राजवल्लभ-वास्तुशास्त्रस्य सप्तमाध्याये नवश्लोकेषु प्रतिपादितमस्ति। वास्तुशास्त्रे प्रायः एकशाल-द्विशाल-त्रिशाल-चतुश्शाल-सप्तशाल-दशशालेत्यादीनां षट्प्रकारकाणां गृहाणां वर्णनं प्राप्यते। इदं वर्णनं नारदपुराणे अप्यस्ति। एतेषां षट्प्रकारकाणां गृहाणां षोडशभेदाः भवन्ति।[10] नारदमताद् विपरीतं मत्स्यपुराणे एकशाल-द्वशाल-त्रिशाल-

चतुश्शालेति चत्वार्णां प्रकाराणां गृहाणां संक्षिप्तवर्णनम् एव प्राप्यते। तत्र सूत्रधारेण अध्यायस्यास्य प्रथमश्लोके मण्डनेन स्वयमेव निगदितं यदिदं वर्णनं वास्तुशास्त्ररूपी महासागरात् सारांशवदस्ति। अतः स्पष्टं वर्तते यदस्मिन् विषये सूत्रधारेण मण्डनेन यद् द्विशालगृहाणां वर्णनं कृतमस्ति तत् साररूपमेव वर्तते। यथा राजवल्लभवास्तुशास्त्रे –

**द्विशालगेहानि च षोडशैव वास्तूदधेः सारतरं पुनश्च।**[11]

**सन्दर्भ ग्रन्थ –**


1. राजवल्लभवास्तुशास्त्रम् *6.1*
2. अथ द्विशालालयलक्षणानि पदैस्त्रिभिः कोष्ठकरन्ध्रसंख्या।
   तन्मध्यकोष्ठं परिहृत्य युग्मं शालाश्चतस्रो हि भवन्ति दिक्षु।।
   राजवल्लभवास्तुशास्त्रम् *6.17*
3. राजवल्लभवास्तुशास्त्रम् *6.18*
4. राजवल्लभवास्तुशास्त्रम् *6.19*
5. समराङ्गणसूत्रधार *22.7-10*
6. राजवल्लभवास्तुशास्त्रम् *6.20*
7. वास्तुसारप्रकरणम् *1.75-80*
8. राजवल्लभवास्तुशास्त्रम् *6.35*
9. राजवल्लभवास्तुशास्त्रम् *7.2-10*
10. नारदपुराण पूर्वार्ध *2.56.580*
11. राजवल्लभवास्तुशास्त्रम् *7.1*